1466

M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 652

Title: Vedanta kaustubha

632

वेदांत प्रकरणम्

Vedanta Prakarana		: Title
:	:	: Author
:	:	: Editor
:	:	: Year, Vols.
:	:	: Publisher
632 :	:	: Remarks

प्रत्यगात्मा त्वंपदस्य लक्ष्यार्थः तत्पदस्य वाच्यार्थो नाम यतो वा इमानि भूतानि जायं
ते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति सदेव सो
म्येदमग्र आसीत् नासदासीन्नो सदासीत्तदानीं ब्रह्मैवेदमग्र आसीत् आत्मा
वा इदमेक एवाग्र आसीत् इत्यादिवाक्यैः प्रतिपन्नं सर्वज्ञत्वं सर्वेश्वरत्वं प्राज्ञः
इत्येवमादिविशेषणविशिष्टः अनाद्यविद्याश्रयः ततः अविद्यामायाविशेषैस्त्रिमू
र्तित्वादिति विशेषणनिरूपितं सच्चिदानंदमेकरसं ब्रह्म तत्पदस्य वाच्यार्थः इदानीं
क्रमेण प्राप्तं तत्पदस्य वाच्यार्थो नाम सत्यं ज्ञानमनंतं ब्रह्म आनंदं ब्रह्मैवेदममृ
तं पुरस्तात् पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेणाधश्चोर्ध्वंच प्रसृतं ब्रह्मैवेदं विश्व
मिदं वरिष्ठमित्यादिवाक्यैः प्रतिपन्नं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदा
नंताद्वयं ब्रह्म तत्पदस्य लक्ष्यार्थः एवमन्वयव्यतिरेकेण श्रुतियुक्तिभ्यां पदा

म.वा. र्थद्वयं परिशोध्य वाक्यं शृण्वतो वाक्यार्थज्ञानं नोत्पद्यते तथाहि सामानाधिकर
णविशेषणसंबंधः अहंकारादात्मनो लक्षणसंबंधः पदपदार्थ समानाधिकर
३ णविशेषणवाच्यार्थैकदेशं परित्यज्यैकदेशार्थे वृत्तिः विशेषणभावपुरःसरवा
क्यार्थः प्रतिपद्यते सत्यवाक्यस्य मुख्यतात्पर्याभावात् प्रमाणात विशोध्यल
क्षणारत्या वाक्यार्थं प्रतिपादयति लक्षणा त्रिधा जहल्लक्षणा अजहल्लक्षणा
जहदजहल्लक्षणा चेति जहल्लक्षणानाम वाच्यार्थमशेषतः परित्यज्य तत्संबंधि
न्यर्थांतरे वृत्तिः यथा गंगायां घोषः प्रतिवसतीति मनो ब्रह्मेत्यादिवत् अजह
ल्लक्षणानाम वाच्यार्थपरित्यागेनार्थांतरे वृत्तिः यथा शोणस्तिष्ठति सत्यं ज्ञानमनं ३
तं ब्रह्मेत्यादिवत् जहद् जहल्लक्षणानाम आत्मा वा इदमेवाग्र आसीत्

दार्थो नाम वाच्यार्थो लक्ष्यार्थश्चेति द्विधा त्वंपदस्य वाच्यार्थो नाम देहेंद्रियमनो
महा. बुद्धिप्राणाहंकारधर्मविशिष्टः कं स्थूलादिदेहधर्मविशिष्टः मुख्यादींद्रियधर्म
२ विशिष्टः अस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यतीति षड्भावविक
रः अशनापिपासे शोकमोहौ जरामरणे इति षडूर्मयः त्वगसृग्रुधिरमांसम
दास्थिमज्जेति षट्कोशाः एतान्यात्मत्वेनाभिमन्यमानो जाग्रदाद्यवस्थात्रय
विशिष्टः आधिदैविकाधिभौतिकाध्यात्मिकतापत्रयेणाभिभूयमानः अहंक
र्तेत्यभिमानी संचितपुण्यपापाभ्यां स्वर्गनरकादिसुखदुःखाद्यनुभवमा
नः अहं करवाणि अहं दुःखीति प्रतीयमानः प्रसंगात्मा त्वंपदस्य वाच्यार्थः त्वं २
पदस्य लक्ष्यार्थो नाम योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुषः योऽयं द
क्षिणाक्षिणि पुरुष इत्यादिवाक्ये निरूपितः देहेंद्रियविलक्षणतया तत्साक्षि

प्रज्ञाप्रतिष्ठा प्रज्ञानमानंदं ब्रह्म इति ऋग्वेदः अहं ब्रह्मास्मीति यजुर्वेदः तत्त्वम
सीति सामवेदः अयमात्मा ब्रह्मेत्यथर्वणवेदः परो रजसे सावदोम् १
यस्य ज्ञानप्रभावेण दृश्यते सकलं जगत् यद्ज्ञाना छेय आभाति तस्मै ज्ञाना
त्मने नमः अथ ब्रह्मज्ञानार्थं वेदांतमहावाक्यार्थं विचारयिष्यामः महावाक्यं
नाम तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्रह्म ब्रह्मैवेदं सर्वमिति इदं सर्वं यद
यमात्मा ब्रह्म सत्तांतर्याम्यमृतं स यश्चायं पुरुषे यश्चासावादित्ये स एकः सत्यं
ज्ञानमनंतं ब्रह्मैवमादि श्रुतिभ्यः ब्रह्मेत्येतानि पदानि असकृत्कृत्वा वाक्यार्थ
ज्ञानं नोत्पद्यते पुरुषस्य तत्त्वं तत्पदार्थज्ञानाभावादिसतः पदार्थपरिशोधकपू
र्वकं महावाक्यार्थं विचारयेत् पदानि तु तत् त्वं असि इत्येतानि पदानि प

म॰वा॰ श्रीगणेशाय नमः अस्य श्रीमहावाक्यमंत्रस्य परब्रह्म ऋषिः अव्यक्त गायत्री छंदः
परमात्मा देवता तद्बीजं त्वमिति शक्तिः असीति कीलकं मम समस्त पापक्षय
१ पूर्वक ज्ञानविज्ञानद्वारा मोक्षसिध्यर्थे जपे विनियोगः तत् अंगु॰ त्वं तर्ज॰ अ
सि मध्यमा॰ तत् अनामि॰ त्वं कनिष्ठिका॰ असि करतल॰ एवं हृदयादि अथ ध्यानं
शुद्धस्फटिकसंकाशं त्रिनेत्रं चंद्रशेखरं इंदुमंडलमध्यस्थं वंदे देवं सदाशिवं १ मुद्रा
भद्रार्थदत्त्वीपरशुहरिणयुक् बाहुभिर्बाहुमेकं ज्ञानाशक्तिं दधानं भुजगवर
समाबद्धजटाजटाघः आसीनश्चंद्रखंडप्रतिघटितजटाक्षीरगौरस्त्रिनेत्र अ २
व्यादाघेशुकाघैर्मुनिभिरथवृता भावशुद्धिः शिवो नः इति ध्यात्वा मानसे रुप
चारैरभ्यर्च्य लंपृथिव्यादि॰ यथोक्तं जपं कुर्यात् ॐ तदसि तत्त्वमसि

632

वेदांतप्रकरणम्